# वर्णानां सृष्टिप्रक्रियाविचारः

## सुप्रिया-सुइ

**प्रबन्धसारः**

*ऋग्वेदस्य काले त्रयः वर्णाः समाजे आसन्। ते यथा - ब्राह्मणः , क्षत्रियः , विशुः। ऋग्वेदस्य अन्तिमांशे पुरुषसूक्ते शूद्राणाम् उल्लेखः प्राप्यते। चत्वारः वर्णाः विराट्पुरुषादेव जायन्ते स्म इति मतं प्रचलितमासीत्। पुनः गीतायां वर्णितमस्ति यत् गुणाधारेण कर्माधारेण च भगवान् श्रीकृष्णः स्वयमेव वर्णाः सृष्टा इति। **"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः"** गीता (4.13)। गुणाः इत्युक्ते सत्वं , रजः , तमः। गुणत्रयानुसारेण हि वर्णाः सृष्टाः। ब्राह्मणाः सत्वप्रधानाः , क्षत्रियाः रजोगुणप्रधानाः , वैश्याः तमउपसर्नरजोगुणप्रधानाः , एवं शूद्राः तमोगुणप्रधानाः। कर्माधारेण हि वर्णाः सृष्टाः इत्युक्ते सत्वप्रधानस्य ब्राह्मणस्य शमो दमस्तपः चेत्यादीनि कर्माणि। रजःप्रधानस्य क्षत्रियस्य शौर्यं, तेजः प्रभृतीनि कर्माणि। तमउपसर्जनरजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि। तमः प्रधानस्य शूद्रस्य शुश्रुषैव कर्मः इत्येवं उक्तम्। अतः वैदिककाले वर्णभेदः आसीत् एतत् सत्यम्। किन्तु जातिभेदः नासीत्। शनैः शनैः वर्णभेदः गुणः एवं कर्म त्यक्त्वा जन्माधारेणैव प्रचलित आसीत् इति नास्ति संशयः।*

प्राचीनकाले भारतवर्षे वर्णव्यवस्था महत्वपूर्णं स्थानम् अलभत। समाजस्थितानां जनानां कृते कार्यस्य समुचितं विभागं कर्तुं शास्त्रकाराः विविधान् विभागान् अकुर्वन्। समाजस्य विकाशाय एतादृशो विभाग आवश्यक आसीत्। 'वर्ण'-शब्दस्य विविधाः व्युत्पत्तयः अपि दृश्यन्ते। वृञ् वरणे इति धातोः वर्णशब्दस्य उत्पत्तिः। चयणम् वरणम् वा अस्य अर्थः। समाजशास्त्रानुसारं वर्णो नाम वर्गः। प्राचीनकाले जनाः स्वस्वेच्छानुसारेणैव तेषां वृत्तीनां चयनं कुर्वन्ति स्म। तेषां वृत्त्यनुसारेण हि वर्णविभागः अभवत्। अमरकोषे वर्णशब्दस्य त्रयः विभागाः सन्ति। तद्यथा -'वर्णो द्विजादौ, शुक्लादौ, स्तुतौ वर्ण तु चाक्षरे' इत्यमरः।

'आर्यवर्णः' 'दासवर्णः' चेति द्वौ विभागौ ऋग्वेदीयसमाजे आस्ताम्। तेषां शारीरिकः तथा सांस्कृतिको भेदः स्पष्टतया आसीत्। अतः आर्याः अनार्यान् 'कृष्णत्वक्', 'कृष्णगर्भः', 'मृध्रवाक्', 'अकर्मन्', 'अदेवयुः', 'अब्रह्मण्, 'अव्रत', 'अन्यव्रत', 'देवपेयुः', 'शिशनदेवः' नाम्नापि आख्यातवन्तः। परन्तु यं विषयमाधारीकृत्य कृष्णवर्णः गौरवर्णश्चेति वर्णविभागो भवति स्म स आधारो वस्तुतो युक्तियुक्तो नासीत्। आर्याणां भारतवर्षे आगमनात् प्रागपि कतिपयजनाः अत्र निवसन्ति स्म। ते जनाः भारतवर्षस्य प्रकृतवास्तव्या आसन्। परवर्तिनि काले आर्याणां भारतवर्षं प्रति आगमनात् परं द्वयोर्मध्ये युद्धम् अभवत्। युद्धे आर्याः जयलाभं चक्रुः। आर्येणैव विजिताः अनार्याः (प्रकृतवास्तव्याः) शूद्राः अभवन्। पुरोहिताः विजितद्रव्याणां सर्वबृहत् अंशम् अलभन्। शनैः शनैः अस्माकं समाजः तिसृषु श्रेणीषु विभक्ताः अभवन्। यथा - पुरोहिताः, योद्धारः, साधारणजनाश्च। बहुदिवसानन्तरम् ऋग्वेदस्य अन्तिमांशे शूद्राणामुल्लेखो दृश्यते। प्राचीने भारतीयदर्शने वर्णानाम् उत्पत्तिविषये नानाविधा मतवादाः सन्ति।

**दैवीमतवादः**

पुरुषसूक्तानुसारेण, विराटपुरुषात् हि वर्णाः सृष्टः। तद्यथा,

"ब्राह्मणोऽस्य मुखमासीद्बाहू राजन्यः कृतः।
ऊरू तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥"

(ऋग्वेदः - १०/९०/१२)

अर्थात्, विराट्पुरुषस्य मुखात् ब्राह्मणाः, बाहुभ्यां क्षत्रियाः, ऊरुभ्यां वैश्याः पद्भ्यां च शूद्राः अजायन्त।

महाभारते शान्तिपर्वणि वर्णितमस्ति यत् ब्रह्मणो वर्णा अजायन्त -

"ब्राह्मणो मुखतः सृष्टो ब्रह्मणो राजसत्तम।
बाहुभ्यां क्षत्रियः सृष्टः ऊरुभ्यां वैश्य एव च॥"

"वर्णानां परिचर्यार्थं श्रयाणां भरतर्षभ।
वर्णश्चतुर्थः संभूत पद्भ्यां शूद्रो विनिर्मितः॥"

मनुस्मृतौ अपि तथैव समर्थितम्। तथाहि तत्रोक्तं,

"लोकानां तु विवृद्ध्यर्थं मुखबाहुरूपादतः।
ब्राह्मणं क्षत्रियं वैश्यं शूद्रं च निरवर्तयत्॥
लोकाणां सृजनार्थं ब्रह्मणा चत्वारः वर्णाः सृष्टाः।" (१.३१)

विष्णुपुराणानुसारेण, विष्णुना वर्णाः सृष्टाः-

"त्वन्मुखाद्ब्राह्मणास्त्वत्ते बाहोः क्षत्रमाजयत।
वैश्यास्तवोरुजाः शूद्रास्तव पद्भ्यां समुद्गताः॥"

मत्स्यपुराणं, वायुपुराणं, ब्रह्माण्डपुराणञ्च वर्णानां दैव्युत्पत्तिविषयकं मतवादं स्वीचक्रुः। किन्तु, आधुनिकगवेषकाः दैवीयमतवादापेक्षया गुणेन कर्मणा च वर्णानाम् उत्पत्तिम् आधिक्येन स्वीकृतवन्तः। गीतायां वर्णितमस्ति भगवान् श्रीकृष्णः गुणकर्माधारेण वर्णविभागं कृतवान् -

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मविभागशः।
तस्य कर्तारमपि मां विद्ध्यकर्तारमव्ययम्॥"
(गीता-४.१३)

## गुणानुसारेण वर्णव्यवस्था

पूर्वं गुणानुसारेणैव वर्णव्यवस्था स्वीकृता आसीत्। गुणानुसारेण हि ब्राह्मणः क्षत्रियः वैश्यः शूद्रः चेति चत्वारः विभागाः समाजे आसन्। तदा जनसंख्या अधिका नासीत्। ते सर्वे सुखेनैव जीवनं निर्वहन्ति स्म। किन्तु कालक्रमेण जातिभेदप्रथा केवलं जन्मगता वंशगता वा अभवत्। वर्तमानकाले समाजे वर्णानां विविधाः विभागाः सन्ति । भगवान् श्रीकृष्णः गीतायामेवम् उक्तम् -

"ब्राह्मणक्षत्रियविशां शूद्राणाञ्च परन्तप।
कर्माणि प्रविभक्तानि स्वभावप्रभवैर्गुणैः॥"

अर्थात् सः (श्रीकृष्णः) गुणेनैव वर्णानां सृष्टिः अकोरत्। किन्तु, अस्य मन्त्रस्य त्रिविधाः अर्थाः सन्ति ।

**A. प्रथमतः,** गुणाः इत्युक्ते सत्त्वः, रजः, तमः चेति। त्रिगुणेनैव ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रः चेति चत्वारः वर्णाः अजायन्त।

१. सत्त्वः (मुख्यः) = ब्राह्मणः ।
२. रजः (मुख्यः) = क्षत्रियः ।
३. रजः (मुख्यः) + तमः (गौणः) = वैश्यः ।
४. तमः (मुख्यः) = शूद्रः।

तेषां कर्माणि अपि गुणाश्रितानि। तत्र सात्त्विकस्य सत्त्वःप्रधानस्य ब्राह्मणस्य शमो दमः तपः चेत्यादीनि कर्माणि। सत्त्वोपसर्जन-रजःप्रधानस्य क्षत्रियस्य शौर्यं तेजः प्रभृतीनि कर्माणि। तमउपसर्जन-रजःप्रधानस्य वैश्यस्य कृष्यादीनि कर्माणि रजउपसर्जनतमः प्रधानस्य शूद्रस्य शुश्रुषैव कर्म इत्येवं गुणकर्मविभागशः चातुर्वर्ण्यं मया सृष्टम् इत्यर्थः ।

**B. द्वितीयतः,** पूर्वजन्मार्जितस्वभावेनैव प्रभावान्वितगुणानुसारेण वर्णाः अजायन्त एवमपि उक्तम्। वर्तमानकाले मनुष्याणां कर्माणि पूर्वजन्मकृतकार्यानुसारेण अभवन्। एवं मतं प्रचलितमासीत्।

**C. तृतीयतः,** संस्कारवशात् गुणस्य विकाशेन हि समाजे मनुष्याणां चत्वारः विभागाः - एवं मतमपि आसीत्।

## कार्यानुसारेण वर्णविभागः

ऋग्वेदे वर्णितमस्ति प्राचीनकाले भारतवर्षे द्वौ वर्णौ आस्ताम् आर्यः, अनार्यः/ दासवर्णः

चेति। यदा आर्याः भारतवर्षम् आगतवन्तः तदनन्तरं ते कर्माधारेणैव वर्णविभागं अकुर्वन् । यथा-

१. **ब्राह्मणाः - यज्ञकारी ।**
२. **क्षत्रियाः - योद्धाः ।**
३. **विश्/ विशु - व्यावसायीः ।**

बहुदिवसानन्तरं शूद्राः आगतवन्तः। तेषां कार्यमासीत् द्विजातिशुश्रूषा तदा वंशः कुलं वा प्रधानं न। अपितु, उच्चकुलोत्पन्नाः जनाः यदि अकर्म सम्पादयन्ति तर्हि अवश्यमेव स्वस्थानात् विच्युताः अभवन्। कर्मानुगुणं नीचकुलोत्पन्नाः जनाः अपि श्रेष्ठाः भवितुं शक्नुवन्ति स्म। कुलस्तु उच्चः नीचो वा भवितुम् अर्हति। यत्र वंशे श्रेष्ठा परम्परा प्रचलिता आसीत् स उच्चः। पुनः यत्र निकृष्टतमपरम्परा प्रचलिता आसीत् स हि नीचः कुलः। अतः वर्णव्यवस्था जन्माधारिता न अपितु कर्माधारिता आसीत्। महाभारते वनपर्वणि अस्य मतस्य उल्लेखः अस्ति। यथा-

"एकवर्णमिदं पूर्वं विश्वमासीद् युधिष्ठिर।
कर्मक्रियाविभेदेन चातुर्वर्ण्यं प्रतिष्ठितम्॥"
"सर्वे वै योनिजा मर्त्याः सर्वे मूत्रपुरोषजाः।
एकेन्द्रियेन्द्रियार्थवाश्च
तस्माच्छीलगुणैर्द्विजः॥"
"शूद्रोऽपि शीलसम्पन्नं गुनवान्ब्राह्मणो भवेत्।
ब्राह्मणोऽपि क्रियाहीनः शूद्रात् प्रत्यवरो भवेत्॥"
(महाभारतस्य वनपर्वणि)

**गीतायाम् उक्तम् -**

"स्वे स्वे कर्म्मण्यभिरतः संसिद्धिं लभते नरः।
स्वकर्म नियतः सिद्धिं यदा विन्दति तच्छृणु॥"

अस्माकं भारतवर्षे वर्णव्यवस्था आसीत् एतत् सत्यम् । किन्तु, तथाकथितविद्वद्जनाः समाजस्य सुष्ठु परिचालनार्थम् एवं विभागान् अकुर्वन्। किन्तु, साधारणजनाः किमर्थम् एतन्मतम् अनुकुर्युः? अतः विद्वज्जनाः दैवीय-आधारं स्वीकृतवन्तः। यतः तदा समाजे धर्मभीरुलोकाः अधिका आसन्। अतः ते अवश्यमेव तत् मतं स्वीकुर्वन्ति स्म एवं आचरन्ति स्म इति आशयः। किन्तु, शनैः-शनैः एते विभागाः जन्माधारेणैव प्रचलिता अभवन्। वर्तमानकालेऽपि समाजे वर्णविभागः अस्ति। किन्तु, इदानींकाले अस्य नाम **वर्णभेदः** न अपितु **जातिभेदः** इति नामान्तरम्। वर्तमानकाले जातिभेदः एकः सामाजिक: अभिशापः । जनाः एवं स्वीकर्तुं न इच्छन्ति -

"न चर्मणो न रक्तस्य मांसस्य न चास्थिनः।
न जातिरात्मनो जातिव्यवहार प्रकल्पिता॥"
(निरावलम्बोपनिषद्)

अर्थात् जाति: कदापि चर्मणा रक्तमांसेनैव न भवति । न हि आत्मना भवति । केवलं लोकव्यवस्थापनार्थं हि विद्वद्जनाः प्राचीनकाले वर्णविभागं अकुर्वन्।

## सहायकग्रन्थाः


- ऋग्वेदसंहिता- अनु. रमेशचन्द्रदत्त, हरफ प्रकाशनी, कलकाता, २०११
- श्रीमद्भगवद्गीता – स्वामी सत्यानन्दः, श्री श्री रामकृष्ण आश्रमः, २ नं प्राणकृष्ण आद्यलेन, कलिकाता, २००६।
- मनुसंहिता – सम्पा. मानवेन्दु वन्द्योपाध्यायः, संस्कृत पुस्तक भण्डार, कलकाता, १४१०।
- महाभारतम् – अनु. रामनारायणशास्त्री, गीताप्रेस, गोरखपुर, २०४४-विक्रमाब्दः।
- अर्थशास्त्रम् – सम्पा. अनिलचन्द्र वसु, संस्कृत बुक डिपो, कलिकाता, २००५
- विष्णुपुराणम् – टीका. शिवप्रसाद द्विवेदी, चौखम्बा सुरभारती प्रकाशन, वाराणसी, २००७
- Who were the Sudras - B. R. Ambedkar, Annals of the Bhandarkar Oriental Research Institute, 30 (1-2)
- Caste in India (4th edition) - Hutton, John H., London (Oxford University press), 1963.